#=5678

नं० ५६६८—च
प्रत्यङ्गिरा (तन्त्रम्)
पत्राणि २५८ (सम्पूर्णम्)

प्रत्यंगिरा । ८७



प्र॰
१

ॐ श्रीगुरुभ्यो नमः ॐ ब्रह्मलोके सुखासीनं सर्वलोकगुरुं शिवं सर्व
देवमयं साक्षात्सर्वतेजोमयं परं १ सर्वविद्यापरं शश्वत् ज्ञानोपाया
र्णवं हरं प्रणमन्त् सर्वदेवाश्च ऋषयः प्रष्टुमागताः २ वसिष्ठो वाम
देवश्च जाबालिः कपिलस्तथा नारदश्च शुकः कण्वो विश्वामित्रश्च
कश्यपः ३ वात्स्यायनोऽत्रिः शांडिल्य ऋचीको देवलो बुधः अगस्त्य
श्च पुलस्तिश्च दुर्वासारण्यकादयः ४ एवमादिमुनींद्राणां वृंदम-
ध्ये पितामहं ४ पप्रच्छ च मुनिश्रेष्ठः शौनको सुमहातपाः ५ अथ
र्वणस्य माहात्म्यं यथावद्वक्तुमर्हसि उवाच तस्मै देवेशो रहस्यं पर
मं शिवं ६ सर्वदेवमयं साक्षादाथर्वणमिहोच्यते तदर्थ्यं मंत्रमा
गेषु प्रत्यंगिरा समुच्यते ७ चत्वारिंशाद्दचानुष्टुप् प्रत्यृष्ठ ऋगभिश्च

पंचभिः गुह्याद्गुह्यतरं साक्षात्त्रैलोक्यविजयं परं ७ शिवलोके
मयालब्धं समाहितमनाः श्रृणु शांतौ पुष्टौ च वृद्धौ च अपमृत्यु
भयेतथा ८ आभिचारिककृत्यायां शांतौ प्रत्यभिचारिके निग्र
हानुग्रहे चैव सर्वपापहरं शुभं ९ भूतप्रेतपिशाचादि ग्रहपीडा
निवारणं गजाश्वयोः प्रशांतिः स्यात् राष्ट्रशांतिज्वरापहं ११ स्वदे
शभ्रंशनाशं च परचक्रभयापहं सर्वशत्रुक्षयकरं वृष्टिस्तंभनि
वारणं १२ उत्पातशांतिर्देवानां कोपशांतिस्तथैव च ग्रहशांतिः
रोगशांतिः कृत्याशांतिस्तथैव च १३ एवमादीनि कर्माणि सिध्यंति
च फलंति च कुलद्वयविशुद्धात्मा मंत्रार्थज्ञानकोविदः १४ शांति
बुद्धिप्रसन्नात्माजितक्रोधो जितेन्द्रियः दंभाहंकारमोहादिरहितो।

प्र॰ २ 2

ज्ञानविज्ञमः ६५ ध्यानयोगसमारूढः सर्वाभीष्टप्रदायकः मं
त्रमांगिरसंलब्ध्वा सएकः सर्वविज्जयी ६६ विनियोगमथोवक्ष्ये
चत्वारिंशाद्दचांगणैः प्रत्यंगिरायामंत्रस्यऋषिरंगिराप्रकीर्तितः
६७ छंदोनुःष्टुप्समाख्यातंप्रत्यंगिरामहोदया उग्रात्रकृत्यादेवी
स्यात्सर्वारिष्टविनाशिनी ६८ विनियोगोत्रसर्वेषुकार्येषुचतथा
विधः कात्यायन्यैविद्महे कंन्याकुमार्यैधीमहितन्नोडगीप्रचोद
यात् ६९ दशवारंजपित्वा ततःआत्मरक्षांकुर्यात् लक्षयेत्प्रत्यरी
न्सर्वान्ब्राह्मणेनैवयोजयेत् ७० अयुक्तोब्राह्मणेमंत्रोविपरीतफलप्र
दः ॥ तत्रादौशरीरशोधनार्थंप्राजापत्यंचरेत् कुशोदकेनपंचग
व्येनवाचरुहविष्याशीदिनत्रयेअष्टोत्तरशतंजपेत् कृतपुरश्चर

णो भवेत् यां कल्पयंतीति पंच ऋगमंत्रां ते कृते कृत्स्नां वरेश्वं गुष्ठा
भ्यां नमः पुनर्मंत्रं पठेत् सिंहवाहिनी तर्जनीभ्यां नमः मंत्रं प
ठेत् महावले मध्यमाभ्यां नमः मंत्रं महाभैरवी अनामिकाभ्यां न
मः मंत्रं सर्व परकृत्योच्छेदिनी कनिष्ठिकाभ्यां नमः मंत्रं पठेत्
सर्वपरमंत्रोच्छेदिनी करतलकरपृष्ठाभ्यां नमः मंत्रं पठेत् एवं
हृदयादि सिंहीं सिंहमुखीं सर्वी भगवतः प्रोत्फुल्लनेत्रोज्वलां।
स्थूलस्थूलकपालपाशडमरुव्यग्राग्रहस्तांवुजां दंष्ट्राकोटिलस
त्कटात्तकुहरामारक्तनेत्रत्रयां वालेंदूज्ज्वलमौलिकां भगव
तीं प्रत्यंगिरां भावये इति ध्यात्वा ततो दुर्गागायत्रीं जपेत् ॐ
ह्रीं कात्यायन्यै विद्महे कन्याकुमार्यै धीमहि तन्नो दुर्गा प्रचोदया

प्र त् इतिगायत्रीं दशवारं जपित्वा ततः आत्मरक्षां कुर्यात् तद्य
२ था दुंदुर्गीं देवीं शरणमहं प्रपद्ये प्रवब्रह्मद्विषोजहि ओं क्रांक्रीं
3 कृक्षवामस्मेसिंहवरने महाभैरवि ज्वलज्ज्वालाजिह्वे करालव
दने प्रत्यंगिरे क्ष्म्रीं क्ष्रौं: ओं नमो नारायणाय घृणि सूर्य आदित्यों
ओं सहस्रार हुं फट् स्वाहा योमइत्यादि मंत्राणां प्रत्यंगिरा ऋषिः
अति छंदः इंद्रादयो देवताः आत्मरक्षार्थे जपे विनियोगः ओं योमे
पूर्वं गतः पापापापकेनेहकर्मणा इंद्रस्तं देवो राजा जंभयतु शो
षयतु स्तंभयतु तापयतु मारयतु कलिं तस्मै प्रयच्छतु कृतं मम
शिवं ममस्तुभं मम शांतिः स्वस्त्ययनं मम हुं फट् स्वाहा इंद्राय नमः
इंद्रो मे देवः प्रीतो भवतु । ओंकारः सर्वत्र इतिमंत्रेण दशादिक्षु।

दशलोकपालेभ्योमाषान्नबलिंस्वस्वमंत्रेणदद्यात् ॐयतइंद्र
भयामहेततोनोअभयंकृधि मघवञ्छग्धितवतन्नऊॅंऊतिभिर्वि
द्विषोविमृधोजहि ॐयोमेअग्निगतः पापापापकेनेहकर्म्म
णा अग्निस्त्वंदेवोराजाज्वंभयतुशोषयतुस्तंभयतु तापयतु-
मारयतु कलितस्मैषयच्छतुकृतं ममाशिवं ममस्तुभंमम।
शांतिः स्वस्त्ययनं ममस्वस्त्ययनं ममहुंफट्स्वाहा अग्नये
नमः अग्निर्मेदेवः प्रीतोभवतु अग्नेनयसुपथारायेअस्मा
न्विश्वानिदेववयुनानिविद्वान् युयोध्यास्मज्जुहुराणमेनोभूयि
ष्टांतेनमउक्तिंविधेम २ ॐयोमेदक्षिणांगतः पापापापकेनेह
कर्म्मणा यमस्त्वंदेवोराजाज्वंभयतुशोषयतुस्तंभयतुतापय

षु॰ ४ तु मारयतु कलिंतस्मै प्रयच्छतु कृतं मम माशिवं मम मशुभं म
मशांतिः स्वस्त्ययनं मम मङ्गं फट् स्वाहा निर्ऋतये नमः निर्ऋति
र्मे देवः प्रीतो भवतु ॐ अ सुन्वंतम यजमानमिच्छस्तेन स्ये
द्यांतस्कर स्यान्वेषि अन्य मस्मदिच्छ सा द इत्या नमो देव नि-
र्ऋते तुभ्य मस्तु ४ ॐ यो मे पश्चिमगतः पाप्मा पापकेनेह कर्मणा
वरुणस्तं देवो राजा जं भयतु शोषयतु स्तंभयतु तापयतु मा
रयतु कलिंतस्मै प्रयच्छतु कृतं मम माशिवं मम मशुभं मम मशां
तिः स्वस्त्ययनं मम मङ्गं फट् स्वाहा वरुणाय नमः वरुणो मे
देवः प्रीतो भवतु ॐ इमं मे वरुण श्रुधी हव मद्या च मृडयत्वा
मवस्युरा चके ५ ॐ यो मे वायुगतः पाप्मा पापकेनेह कर्मणा

वायुस्त्वंदेवोराजाज्वंभयतु स्तंभयतु तापयतु मारयतु कलिं
तस्मैप्रयच्छतु कृतंममशिवंममशुभंममशांतिः स्वस्त्ययनं-
ममझुंफट् स्वाहा वायवेनमः वायुर्मेदेवः प्रीतोभवतु ॐवा
योःशतंहरीणांसुवहस्रैयोस्थाणां उतवातेसहस्रिणोरथआया
तुपानसा ६ ॐयोमेउत्तरगतः पाप्मा पापकेनेहकर्म्मणा सोम
स्त्वंदेवोराजाज्वंभयतुशोषयतुस्तंभयतु तापयतुमारयतुक-
लिंतस्मैप्रयच्छतु कृतंममशिवंममशुभंममशांतिः स्वस्त्यय
नंममझुंफट् स्वाहा सोमायनमः सोमोदेवः प्रीतोभवतु ॐवयं
सोमव्रतेनवमनस्तनूषुबिभ्रतः प्रजावंतः सचेमहि ७ योमेईशा
नगतः पाप्मापापकेनेहकर्म्मणा ईशानस्त्वंदेवोराजाज्वंभयतु

प्र॰ शोषयतुस्तंभयतुतापयतुमारयतु कलिंतस्मैप्रयच्छतु
५ कृतंममशिवंममशुभं ममशांतिः स्वस्त्ययनंममहुंफट् स्वा
हा ईशानायनमः ईशानोमेदेवःप्रीतोभवतु ॐतमीशानं
जगतस्तस्थुषस्पतिंधियंजिन्वमवसेहूमहेवयं पूषानोयथा
देवसामसद्वृधेरक्षितापायुरदब्धः स्वस्तये ८ ॐयोमेऊर्ध्वग
तःपाप्मापापकेनेहकर्मणा ब्रह्मातंदेवोराजाजृंभयतुशोष
यतुस्तंभयतुतापयतुमारयतुकलिंतस्मैप्रयच्छतुकृतंमम
शिवंममशुभंममशांतिः स्वस्त्ययनंममहुंफट्स्वाहा ब्रह्म
णेनमः ब्रह्मामेदेवःप्रीतोभवतु ॐब्रह्मयज्ञानंप्रथमंपुरस्ता
द्विसीमतःसुरुचोवेनआवःआवःसबुध्न्याउपमाअस्यविष्ठाःस

सतश्च योनिमसतश्चविवः ९ ओं यो मे भूमिगतः पाप्मा पापकेने
हकर्म्मणा भूमिस्त्वं देवी राज्ञी जंभयतु शोषयतु स्तंभयतु तापयतु
मारयतु कलितस्मै कृतं मम शिवं मम शुभं मम शांतिः स्वस्त्ययनं
मम ऊँ फट् स्वाहा पृथिव्यै नमः ओं पृथिवी मे देवी प्रीतो भवतु ओं
स्योना पृथिवी भवा नृक्षरा निवेशनी यच्छा नः शर्म सप्रथः १० ओं यो
मेंतरिक्षगतः पाप्मा पापकेनेह कर्म्मणा वायुस्त्वं देवो राजा जंभय
तु शोषयतु स्तंभयतु तापयतु मारयतु कलितस्मै प्रयच्छतु कृतं
मम शिवं मम शुभं मम शांतिः स्वस्त्ययनं मम ऊँ फट् स्वाहा वाय
वे नमः वायुर्मे देवः प्रीतो भवतु अस्मे रुद्रा मेहना पर्वतासो वृत्र
हत्ये भरहूतौ सजोषाः यः शंसते स्तुवते धायि पज्र इंद्र ज्येष्ठा अस्माः

प्र॰
६

ग्रवंतुदेवाः ११ ॐयोमेआकाशगतःपाप्मापापकेनेहकर्म्मणा
आकाशस्तंदेवोराजाजंभयतुस्तंभयतुतापयतुमारयतुकलित
स्मैषयच्छतु कृतंममशिवंममशुभंममशांतिः स्वस्त्ययनंममङ्कं
फट्स्वाहा द्यौर्नमः ॐद्यौर्मेदेवीप्रीताभवतु ॐअग्निर्मूर्द्धादिवः
ककुत्पतिः पृथिव्याअयंअपांरेतांसिजिन्वति १२ ॐयोमेसर्वग
तःपाप्मापापकेनेहकर्म्मणा विष्णुस्तंदेवोराजाजंभयतुशोष
यतुस्तंभयतुतापयतुमारयतुकलितस्मैषयच्छतुकृतंमम
शिवंममशुभंममशांतिः स्वस्त्ययनंममङ्कंफट्स्वाहा विष्णवे
नमः विष्णोर्मेदेवःप्रीतोभवतु ॐइदंविष्णुर्विचक्रमेत्रेधानि
दधेपदं समूढमस्यपांसुरे १३इतिदिग्बंधनमात्मरक्षांचकृत्वा-

ततो जपमारभेत् ततस्ताम्रमयं मृन्मयं वा कलशं स्थाप्य पयसा
क्षीरेण वा पूर्य शांत्यादिषु प्रत्यभिचारेष्वाज्येन पूरणं शत्रूणामभि
चारे आयसः कलशः सार्षपतैलेन पूरणीयः तच्च धातुमयीं वा
सुवर्णिकमयीं प्रतिमां विधाय महोपचारैः पूजयेत् शांतावांगि
रसा उपचाराः अभिचारे आसुराः उपचाराः आयसी प्रतिमा विभी
तकधा दारुमयी सप्तधातुमयी वा कृष्णवर्णिकर्ममयी वा भवति-
रात्रौ कर्म दक्षिणाभिमुखः प्रत्यङ्मुखो वा कुर्यात पलं तदर्द्धार्द्धमितं
सुवर्णं चतुर्गुणं रजतं अशक्तौ शांत्यादिकार्येषु तयोरभावादाश्रेणि
कुर्यात्ताम्रप्रतिमां गिरायाः आवाहनादि दक्षिणान्तं महाराजोपचारैः
संपूज्य अहोरात्रमविच्छिन्नं गोघृतदीपं पुरतो वस्थाप्य शांतिगणं।

प्र· पठेद्दादावंते च अभिलषितकामं मनसि विधाय मंत्रं सूक्तं वा ऋक्
७ गणं वा जपेत् तथा च गोपथब्राह्मणं प्राङ्मुखो वाग्यतो बर्हिषु
पविश्य सहस्रं कृत्वा आवर्तयेत्सिध्यंत्यऽस्यार्थाः सर्वकर्माणि चे
ति ब्राह्मणं तथा च कौशिकः सहस्रं हि गणावृत्तौ मंत्रावृत्तौ दशायु
तं सूक्तानामयुतं प्रोक्ता संख्यानादेशिकी विधौ सर्वारिष्टे तथा प्र
ष्ठौ भैषज्ये पौष्टिके रिपौ मंत्रयोगः संप्रयुक्तः सर्वारिष्टनिवर्हणः
महाव्याधौ महामायां प्रत्यभिचारयोः प्रयोगो सूक्तमंत्राभ्यां तथा
चाद्भुतदर्शने मंत्रसूक्तगणैः कार्यं राजा कार्याभिचारिके असा।
ध्यमपि यत्किंचित्साधयेत्त्रिविधं कृतं एकं द्वित्रीणि वा कुर्याद्वृन्नभि
र्वृद्धधा कृतं असत्कृतक्रियमाणं हिड्ः साध्यमपि साधयेदिति–

यांकल्पयंतीति महामंत्रंसूक्तं वाशुक्लाष्टमीमारभ्य पर्वपर्यं
= रुवल =
तं औडुंबरदंडंपुरुषमात्रंधारयन् शत्रुनामसंयुक्तंसहस्रंजपेत्
शत्रुर्महारोगग्रस्तोभवति अष्टोत्तरसहस्रंशतंवाप्रतिदिनंजपेत्-
पुरतोगिरायाः शत्रुर्महाग्रहग्रस्तोभवति कृष्णप्रतिपदमारभ्यच
तुर्दशीपर्यंतं विभीतकदंडमष्टप्रादेशमात्रमादाय शत्रुनामसं
युक्तंजपेत् महाव्याधिगृहीतोम्रियतेच नसन्देहः अर्कसमि
धः कारस्करसमिद्धोवाभल्लातकसमिद्धोवातैलाभ्यक्ताः अष्टोत्तर
सहस्रंवाअष्टोत्तरशतंहुत्वा सप्तरात्रेणशत्रुक्षयोभवति केवल
जपमात्रेणमासांतेरिपुर्महा ज्वराभिभूतोमृत्युमेति ईश्वरालये
तालपत्रेश्मशानकाष्टमष्या शत्रुनामसंयुक्तं मंत्रंलिखित्वा श्म

प्र॰ शानक(ष्टमपष्ठ्याशत्रुनाम)ज्जलेन लिखित्वा अष्टोत्तरसहस्रं ज
ग्र पित्वा प्रादेशमात्रे भूम्यां निखनेत् तत्क्षणात्सर्वज्वरो भवति-
8 कुलक्षयो भवति यथाशक्ति गोभूवस्त्रहिरण्यादि दक्षिणां गुरवे
ददाति तथा च मंत्रा तच्छंदोयोरिति मंत्रस्य वार्हस्पत्य शंयुर्ऋषिः
शक्करी छंदः विश्वेदेवा देवता शांत्यर्थे जपे विनियोगः ॐ तच्छंयो
रावृणीमहे मनो ब्रह्मणे मइं नो अपि वातयमनः ॐ शांतिः शांतिः
शांतिः यां कल्पयंतीति मंत्राणां प्रत्यंगिरा ऋषिः अनुष्टुप् बृहत्य
छंदांसि उग्रा कृत्या देवता ॐ बीजं ह्रीं शक्तिः ममाभीष्टसिध्यर्थे ज
पे विनियोगः ध्यानं पूर्ववत् मूलमंत्रं सकृज्जपेत् स च अवब
ह्मद्विषो जहि ॐ ह्रां ह्रीं कृष्णवाससे सिंहवदने महाबले महाभैरवि

ज्वलज्ज्वालाग्निजिह्वे करालवदने प्रत्यंगिरे क्ष्म्रीं क्ष्म्रौं: ॐ नमो नाराय-
णाय घृणिः सूर्य आदित्यों सहस्रार हुं फट् अवब्रह्मद्विषो जहि इत्यंते
ततः सूक्तं जपेत् ॐ क्लीं यां कल्पयंति नो रयः क्रूरां कृत्यां वधूमिव तां ब्र
ह्मणा अपनिर्णुद्म प्रत्यक्कर्तारमिच्छतु क्लीं ॐ १ ॐ शीर्षण्वतीं कर्णवतीं
विश्वरूपां भयंकरीं यः शाहिणो दिहाद्य त्वां चित्तं त्वं योजयाशुभिः २
ॐ येन दिष्टेह वदसि प्रतिकलमद्यायिनि ते मे वेत्तो निवत्यो षमास्मान्न
ह्योऽग्रनागसः ३ ॐ अभिवर्त स्वकर्तारं निरस्ताभिरोजसा आयुरस्यनि
कृन्त स्वप्रजां च पुरुषादिनि ४ ॐ यस्त्वा कृत्ये चकारेह तं त्वं गच्छ पुन
र्नैवे आरातीः कृत्ये नाशय सर्वाश्च यातुधान्यः ५ अथ द्वितीयप्रयो
गः ॥ त्रिषु कृत्येति पंचऋग्भिः कपिलाक्षीरं भुंजानो त्रिरात्रं जपेत् ॥

प्र· ब्रह्मसमो भवेत् पलाशसमिद्भिः पयसाक्ताभिः अष्टशतंजुहु-
५ यात् सप्तदिनमध्ये ग्रहदोषान्नश्यंति क्षुद्रबाधानश्यंति शांतिर्भ
१ वति अश्वत्थसमिद्भिः यशस्कामो जुहोति नदीतीरे श्मशाने रुद्रा
लयेवा भस्मराशिं कृत्वा यन्नाम मनसा ध्यात्वा अष्टसहस्रं जपेत्
तस्य महाज्वरो भवेत् अहोरात्रं भस्माभिमंत्रितं तस्य गात्रे प्रक्षिपे
त् सर्वराज्ञां समो भवेत् वांछितपदं प्राप्नोति विष्णुग्रहे नित्यमष्टो
त्तरसहस्रं जपेत् इष्टसिद्धिर्भवति एवं संवत्सरं जपेत् ब्रह्मसमो
भवति तिलान्दशभारदक्षिणां ददाति मंत्राः ॐ क्षिप्रं कृत्ये निव
र्तस्व कर्तुरेव ग्रहान्प्रति पशूँश्चैवास्य नाशय वीरांश्चास्य निबर्हय।
ॐ यस्त्वा कृत्ये प्रतियाप विद्वानऽविदुषो ग्रहान् तस्यैवेतः परेत्यास्तु तन्नू

न्कृंधि परुष्परुः २ ॐ प्रतीचीत्वापसेधतु व्रह्मरोचिएमित्रहा अ
ग्निश्च कृत्येरक्षोहारिप्रहाजएकपात् ३ ॐ यथा त्वांगिरसः पूर्वे भृग
वश्चापसेधिरे अत्रयश्च वशिष्ठाश्च तथैतस्त्वापसेधम ४ ॐ यस्त्वेप
हृषिसंदधौ रथस्येव विभुर्धिया तंगच्छतत्रतेजनमस्तात स्तेप्ययंज
नः ५ अथ तृतीयप्रयोगः यो नः कृत्येरणस्थो वेति पंच ऋग्भिः
पूर्वपक्ष प्रतिपदमारभ्य कपिलाक्षीरं वा भैक्ष्योहारं वा चरुं वा-
हविष्याशी यावत् पर्वपर्यंतं जपेत् सर्वकृत्याशांतिर्भवति अप
मृत्युं जयति भूतप्रेतपिशाचादि ब्रह्मराक्षस अपस्मारादि यक्षगंध
र्वविद्याधरग्रहस्कंदग्रहबाधा न नश्यंति सर्वरोगान् जयति उत्त
रोत्तरं महाशांतिर्भवति नित्यमष्टोत्तरशतं जपेत् यथाशक्ति वा

प्र॰
पृ॰
10

वीजपेत् अहरहः श्रीर्वर्द्धते सर्वत्तुद्रवाधानश्यंति नामसंयुक्तम
ष्टोत्तरसहस्रं जुहुयात् सर्वदोषानश्यंति तैलमाषसंयुक्तं चरुंआ
ज्येनसंयुक्तं अष्टोत्तरसहस्रं जुहुयात् अभिचारशांतिर्भवति ति
लतंडुलपलाशकुसुमैर्मिश्रीकृत्य आज्याक्तैः शांतिः जिह्वायांकृत्वा
मासमेकं सर्वदुःखहरो भवति महोत्पातशांतिर्भवति जीवेद्वर्षश
तं अंगुलीयकादिस्वर्णं दक्षिणा हस्त्यश्वगोमहिषींवादक्षिणा श्रीः
ॐ योनः कृत्येरणस्थो वा कश्चिद्वान्योभिहिंसति तस्य त्विंद्रोरिवेद्धो
ग्निस्तन्नून्नु छस्वहेहिता १ भवाः शर्वी देवहेढिमस्य त्तिपंतं पापकृ
त्वने हरस्वतीत्वं च कृत्ये मोच्छिषस्तस्य किंचन २ योनः शिवासः पथानं
परायांति परावतं तैर्देवि राज्ञ्याः कृत्यानोगमयः स्वानुचिंतये ३ ॥

योनः कश्चिदुहाराति र्मनसाप्यभिदासति दूरस्थो वांतिकस्थोवा
तस्यहृदयमस्त्रकापिव ४ येनासिक्त्येप्रहितोदृढेनास्माजिघां
सय तस्याव्यनत्त्वहिनस्तुहरसाशानिः ५ अथ चतुर्थप्रयोगः
यद्युवैषिद्विपद्यस्मानितिपंचऋग्भिः समुद्रगामिनींनदींगत्वा-
नित्यमष्टोत्तरशातंजपेत् पश्चादष्टाविंशत्यंजलिनाजलंगृहीत्वा
रिपुदेशेक्षिपेत् यावद्बुद्धिस्पजपेत् सोचिरेणसप्ताहान्म्रयते।
विभीततरुमष्टप्रादेशमात्रंदंडंधारयन् यन्नाममनसाध्यात्वा
जपेत् तस्याचिरेणसप्ताहान्मृत्युर्भवति नित्यंकेवलजपमात्रे
णशत्रोःकुलक्षयोभवति क्षयकुष्टादिरोगानश्यंति सूर्याभिमु
खोभूत्वानित्यमष्टाविंशंजपेत् शत्रुर्महाज्वराभिभूतोभवति अ

प्र॰
११

र्कसमिद्भिः अष्टोत्तरशतं तिलतैलेनार्कं जुहुयात् शत्रोर्गज
तुरंगपुत्रादयो नश्यंति गोभूहिरण्यदक्षिणां ददाति अथ मंत्राः।
यद्युवैषि द्विपद्यस्मान्यदि वैषि चतुष्पदी निरस्तेतो व्रजास्माभिः क
र्तुरष्टापदी गृहान् १ ॐ यो नः शपादशपतो यश्च नः शपतः श
पात् वृक्षमिव विद्युदा स्तुत मा मूढादनु शोषय २ ॐ यं द्विष्मो
यश्च नो द्वेष्ट्यध्यायुर्यश्च नः शपात् शुनापिष्टमिव वृक्षामंतं प्र
त्यस्यस्वमृत्यवे ३ यश्च सापत्नः शपतो यश्च जामी शपाति नः।
ब्रह्मा च यत् क्रुद्धः शपात्सर्वं तन्मेऽध्यस्पदं ४ सर्वबंधुश्चासर्वबंधुश्चा
योऽस्माँ अभिदासति तस्य त्वं भिद्यधिष्ठाय दाविष्पूर्यंतस्थिरः ५
अथ पंचमप्रयोगः अभिप्रेहीति पंचऋग्भिः कृष्णाष्टमीमारभ्य-

यावदष्टमीपर्यंतं जपेत् ६ शिवलिंगं स्पृष्ट्वा अभिचारिककृत्यां
नाशयति गजतुरंगाणां महाव्याधिः प्रणश्यति ईश्वरेणापि राक्षि
तुं न शक्यते जानुमात्रोदके स्थित्वा त्रिसंध्यं जपेत् उदकांजलिमष्टा
विंशतिसंख्याकं यावदुद्दिश्य तं नाम्ना संयुक्तं प्रक्षिपेत् सोचिरेण
सन्नाहातो भवति रुद्रदेवालये दक्षिणाभिमुखो भूत्वा नित्यम
ष्टोत्तरशतं जपेत् एकविंशतिदिनानि शत्रुकलत्रादयो नश्यंति
तिलतंडुलैर्ब्रह्मवृक्षकुसुमैर्वा घृताक्तैर्मासमेकमष्टोत्तरसहस्रं
हुत्वा सकलव्याधिदुःखं हंति महोत्पातशांतिर्भवति वर्षशतं-
जीवती गुरुकुवच्चुलहृदयं दक्षिणामुखः ग्रामे वा रासीरे वा ओं अ
भिप्रेहि सहस्राक्षं युक्ताशुशापर्थं रथे शत्रून्नन्विच्छन्ती कृत्ये वृकी-

प्र॰ वाविवतोयहात् १ परिणो वृंग्धि शपथाद्दहन्नग्निरिवहृदं शत्रू
स नेवामिनोजहि दिव्याद्वृत्तामिवाशनिः २ शत्रून्मेघोथशापथा-
त्कृत्याश्च सुहृदो सुहृत् जिसान्सुत्तणाश्च दुर्हृदः समिद्धं जातवेदसं।
12 ३ असपत्नं पुरस्तान्नः शिवं दक्षिणतस्कृधि अभयं सततं प-
श्चादिन्द्र मुत्तरतोगृहे ४ परेहि कृत्ये मातिष्ठो विद्धस्येव पदंनय
मृगस्यहि मृगारिघो नेत्वानिकर्तुमर्हति ५ अथषष्ठप्रयोगः।
अग्नासो घोररूपे इति पंचऋग्भिः कृष्णाष्टमीमारभ्य तत्पर्वप
र्यन्तं शालितंडुलान्नाज्याक्तान्नित्यमष्टसहस्रं जुहुयात् सर्वव्या
धिनिवारणं भवति अहरहः स्त्रीगर्भ ईते सर्वक्षुद्रबाधानश्यं
ति सर्वं शत्रूनजयति अपमृत्युभूतप्रेतपिशाचादिब्रह्मराक्ष-

सयक्षगंधर्वविद्याधरस्कंदग्रहापस्मारादिसमस्तबाधानिवार
यंति पूर्वोक्तप्रयोगेण शत्रुनामयुतेन शत्रुनाशः सर्वरोगान्ना
शयंति उत्तरोत्तरमहावृद्धिः सर्वशांतिश्च भवति मंत्राः अग्या-
स्ये घोररूपे विषुरूपे विनाशिनि जृंभिता प्रतियक्षस्व स्वयमा
दायचाद्भुतं १ त्वमिंद्रो यमो वरुणस्त्वमापोग्निस्तथानिलः त्वंब
ह्माचैव रुद्रश्च त्वष्टाचैव प्रजापतिः २ आवर्तश्च निवर्तश्च ऋतवः
परिवत्सरा अहोरात्राश्च द्वाश्च दिशाश्च प्रदिशाश्च मे ३ त्वं वरु-
णाग्नियमं सोमं त्वमापोश्च रथानिलं अत्राहुत्यपयूंश्चैतान्नु
त्यादयासि चाद्भुतं ४ ये मेदमेदारुगर्भेशयानं धियासहितं पुरु
षं निजड्ढः कुंभीपाकं नरकं ग्रीववद्धाहुतान्येवं पुरुषासो यम-

प्र॰ स्य ४ अथसप्तमप्रयोगः अभ्यक्तेति पंच ऋग्भिः नित्यमष्टोत्त
१२ रशतजपमात्रेण सर्वशत्रुक्षयोभवेत् सर्वकृत्याशांतिर्भवति ल
13 वणकार्पासबीजाभ्यां घृताक्ताभ्यामष्टसहस्रंजुहुयात् सूर्या
भिमुखोष्टाधिकशतंजपेत् महावृष्टिस्तंभोभवति समुद्रमपि
शोषयति पंचपलानिहिरण्यंदक्षिणा मंत्राः अभ्यक्ताखलंकृ-
ताः सर्वंनोदुहिरितंवह जानीथाश्चैवकृत्यानांकर्तृन्न्यायवेतसः
१ यथारिहंतिपुरासीम्नंतथैवेदेथास्युकृतन्नरः तथात्वयायुजाव
यंतस्यनिकृघ्नः स्थासुजंगमं २ उत्तिष्ठैवपरेहितोक्तातेचकिमि-
हेच्छ् सिग्रीवास्तेकृत्येपादौचाभिकृत्यामिनिद्रुव ३ स्वायसाः सं
तिनोसद्योविद्मचैवपरूंषिते तैस्तेनिकृघ्नस्तान्युग्रेपदिनोजीव

पश्यरीन् ४ मास्योच्छिष्टोद्दिपदमोन किंचिच्चिन्नतुष्यदं माज्ञातीनन्नु
ज्ञानस्वान्मामावशिप्रतिवेशिनौ ५ अथअष्टमप्रयोगः शत्रूयता-
प्रहितेति पंचऋगभिः तिलतंडुलानाज्याक्तानष्टोत्तरशतं जुहुयात्
अष्टमासैः श्रीवृद्धिर्भवति आयुकामो दूर्वाअष्टोत्तरशतं जुहुया
त् अपमृत्युं जयति सर्वपापक्षयो भवति चित्तशांतिर्भवति प
लाशकुसुमैर्हुत्वा ब्रह्मतेजोमयं भवति आयुरारोग्यैश्वर्याभि
कामी तिलतंडुलद्वयेनाज्याक्तानष्टशतं हुत्वा सप्तमदिवसे
आरोग्यं भवति मासेन परिपूर्णेन इष्टसिद्धिर्भवति पापवि-
शुद्धिर्भवति अत्यंतचित्तनिर्मलो भवति सर्वग्रहदोषा नश्यंति
बिल्ववृक्षसमिद्भिस्तत् कुसुमैर्वा गव्येनाक्तैरष्टसहस्रं जुहुयात्।

स्तं० १४

१५

सर्वपापक्षयोभवति महापातकोपपातकानिनश्यंति मास
त्रयंनित्यमष्टोत्तरसहस्रंजुहुयात् ब्रह्महत्याशांतिर्भवति
स्नानकालेत्रिरुच्चार्य अघमर्षणात्सर्वपापक्षयोभवति जा
जान्वदघ्नेजलेजपतोभिचारशांतिर्ग्रहशांतिश्चभवति अष्टाविं
शतिर्जपेत् कुंकुमकर्पूरचंदनैः सोदसंयुतंजलंघटेसं-
स्थाप्य अष्टशतंकूर्चेनस्पृष्ट्वाअभिमंत्रितंअभिषिंचेत् अभिचा
रकृत्यांनाशयति ग्रहदोषानश्यंति भूतप्रेतपिशाचापस्मारद-
योनश्यंति वंध्यापुत्रंलभते कुमारीपतिं कन्यार्थीकन्यांल
भते नाभिमात्रेजलेस्थित्वोदयास्तमपर्यंतंजपेत्सहस्रंसप्त
दिनादर्वाक् महावृष्टिर्भवति वंजुलसमिद्भिः पयसाक्ताभिरष्ट

सह संजुहुयात् महावृष्टिर्भवति लवणेन वृष्टिस्तंभश्चाप्यने
नैव सूक्तेन स्वयंभूलिंगे महापूजां कृत्वा शुद्धतोयेनाभिषे-
कं कुर्यात् सप्ताहाद्वृष्टिर्भवति ज्वरदाहपीडोपशमनश्चजा
यते शनैश्चरेऽश्वत्थवृक्षं संस्पृशन् जपेत् आयुरारोग्यमैश्व
र्यं भवति ग्रहाणामानुकूल्यं च जायते वर्षशतं जीवति स
र्वविपत्क्षयो भवति गुरुदेवताज्ञानधनदोषा नश्यंति अपा
मार्गसमिद्भिः सकंटकाभिः गोमूत्राक्ताभिः अष्टशतं जन्मन-
क्षत्रे हुत्वा ग्रहदोषा नश्यंति अथ मंत्राः शत्रूयताप्रहितास्मिमां
येनास्मियथायतः ततस्तथात्वानुदेतुयो २ यमंतर्मयिश्रितः
एवं त्वं निकृतास्माभिर्ब्रह्मणा देवि सर्वशः यथेतमाश्रितो गत्वाया.

प्र. पधीनेव नो जहि २ यथा विद्युद्धतो वृक्ष आमूलादनुशुष्यति एवं
१५ स प्रतिशुष्यतु यो मे पापं चिकीर्षति ३ यो नः स्वोऽरणो यश्च नि
15 ष्ट्यो जिघांसति देवास्तं सर्वे धूर्वंतु ब्रह्म कर्म ममान्तरं शर्म वर्म
ममान्तरमव ब्रह्मद्विषो जहि ४ यथा प्रतिशुको भूत्वा तमेव
प्रतिधावति पापं तमेव धावतु यो मे पापं चिकीर्षति ५ अथ न
वमप्रयोगः यो मे करोति यं च ऋग्भिः शनैश्चरदिवसे अश्वत्थ
वृक्षं संस्पृश्य अष्टोत्तरशतं जपेत् आयुरारोग्यमैश्वर्यं भवति
अपमृत्युं जयति जन्मनक्षत्रे वा कुलिकोदये अष्टमराशौ वा वि
षमघटिकायां अथ नक्षत्रे वा संस्पृश्य नामसंयुक्तमेकपंचाशत्
जपं कुर्यात् तीक्ष्णशस्त्रेण छेदयेत् तत्प्रतिकृतिं एवं दशाहं कु-

यीत् शत्रुनाशः यमोपि नरक्षितं शक्तः मंत्रः ओं यो मे करोति प्रहा
रे योगारे योनिवेशने यो मे केशान खं कुर्युरंजने दंतधावने प्रति-
सर प्रतिधावकुमार इव पितृग्रहात् मूर्धानमेषां स्फोटय वध
मेषां कुलं क्वाथि २ एते जह्यं जसान्नजवे मह्यमग्रे सदाधियः दुर्म
दाश्च नग्रनाशश्चाविधीनाच्छोचिषाविध्यतंतून्वैव स्वतस्य सदने-
यमस्य ३ यो नो रयिं दुश्चरितासोग्रग्रेजुह्वमिन्नी सोग्रन्तं वदंतः
तेषां वपूंष्यस्त्रिंषा जातवेदः शुष्कं नवृत्तमामि संदह स्वकाक्षव
र्णीमरुद्रूपे वृहत्कर्णी भयंकरे देवि देवि महादेवि मम शत्रून्वि
नाशाय मम शत्रून्विनाशाय श्रवब्रह्मद्विषो जहि ५।४।५। कु
वेरं ते मुखमिति ऋक तरुणा मपर्णीः अष्टशतं पयसा क्तं तिल

पु· तंडुलसंयुक्तं जुहुयात् माहेश्वरसंनिपातज्वराः क्षिप्रं नश्यंति स
१६ द्यः सुखी भवति अष्टोत्तरसहस्रं तर्पणं कुर्यात् अथवा त्रिमध्वा
16 क्ततिलहोमेन वा सहस्रं गुडूचीसमिद्भिः त्रिमध्वाक्ताभिर्दूर्वाभिर्होमे
न सर्वज्वरशांतिर्भवति पलत्रयं सुवर्णं दक्षिणा मंत्रः ॐ कुवेरं
ते मुखं रौद्रं नंदिमानंदिमावह ज्वरं मृत्युभयं घोरं विषं नाशय
मे ज्वरः १ एवं शोषय मारय स्वाहा अवबध्नेति पादं शुचिर्भूत्वा
त्रिसहस्रं त्रिपक्षं जपेत् सर्वपापैः प्रमुच्यते सर्वं शुभमवाप्नो
ति सर्वान् शत्रून् जयति जितेंद्रियो हविष्याशी लक्षं जपेत् इष्ट
महासिद्धिर्भवति अनेनान्नमभिमंत्र्य भुंजीत सर्वविषमयं हं
ति समाहितमना भूत्वा लक्षं जपेत् सर्वकृत्योच्छेदः शतं आयुरा

रोग्यमवाप्नोति दूर्वायास्संचामृतसंयुक्तयालक्षंजुहोतिमृतो
पिजीवतिराजयक्ष्मादयोरोगाविलयंयांति कालज्वरमहाज्वरशी
तज्वरसर्वज्वरनिवृत्तिर्भवति महादाहोपशांतिर्भवति भूतप्रे
तपिशाचादिबाधानश्यंति दृष्टिदोषानश्यंति लक्षंतिलहोमेम
हापातकप्रायश्चित्तंभवति यएवंमंत्रंदशलक्षंजपेदाज्येन
होमंकुर्यात् अष्टौमहासिद्धयोभवंति इंद्राक्षीत्वंईशयति यं
यंकामंकामयतेतंतमाप्नोति यएनंमंत्रंजपेच्छतलक्षंब्रह्मा
परोक्षंभवति ब्रह्मपरोक्षंभवतीत्याह तः पिप्पलादशौनकौमं
त्रसूक्तगणजपेषु आद्यंतयोः शांतिंपठेत् शौनकोमंत्रः ॥
अथवब्रह्मेत्यथर्वाऋषिः एकपदागायत्रीछंदः ॐ आकृत्यादेवता

प्र· ब्रूंबीजं ग्रंशक्तिः ॐकीलकं चतुर्विधपुरुषार्थसिध्यर्थेजपे-
१७ विनियोगः मंत्रः ॐग्रब्रह्मद्विषोजहि अथकृत्योत्पादनमंत्रः
17 ॐक्रांनमःअंगुष्ठाभ्यांनमः ॐक्रींनमः तर्जनीभ्यांनमः ॐक्रूं
नमः मध्यमाभ्यांनमः ॐक्रैंनमःअनामिकाभ्यांनमः ॐक्रौं
नमः कनिष्ठिकाभ्यांनमः ॐक्रः नमः करतलकरपृष्ठाभ्यां
नमः एवंहृदयादिन्यासः षट्फट्जहीत्यस्यमंत्रस्यअंगि
राऋषिः कृत्यादेवता अनुष्टुप्छंदः कृत्योत्पादननिमित्ते
जपेविनियोगः ॐषट्फट्जहिमहाकृत्येविधूमाग्निसमप्र
भे जहिशत्रूंस्त्रिशूलेनक्रुद्धस्वपिवशोणितं । जपसंख्याअ
युतमेकंमालामंत्रंजपित्वा सर्वत्रजपहोमाद्यंतेप्रत्यंगिरा

स्तोत्रं पठेत् आत्मरक्षानंतरम् कलशोपरि प्रतिमायां पूजां कृ
त्वा आवाहनादिषोडशोपचारैः पूजयेत् ओं क्षीं यां कल्पयंति नो
रयः क्रूरां कृत्यां वधूमिव तां ब्रह्मणा अपनिर्णुद्मः प्रत्यक्कर्तारमृ
च्छतु क्षीं ओं श्रीप्रत्यंगिरायै नमः मंत्रपुष्पांजलिं समर्पयामि ।
यथाशक्त्या षोडशोपचारैः पूजनविधौ परिपूर्णमस्तु तत्र शां-
तिपाठः ओं शांतिगणस्य ब्रह्मा सोमो ऋषिः संकृतिः सर्वाणि छंदां
सि ओं भूः ओं भुवः ओं स्वः ओं महः ओं जनः ओं तपः ओं सत्यं ओं तत्स।
वितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ओं आपो
ज्योतिरसोमृतं ब्रह्म भूर्भुवः स्वरोम् ओं शांता द्यौः शांता पृथिवी
शांतमिदमुर्व (न्त)रिक्षं शांता उदन्वतीरापः शांता नः संत्वोषधीः

पृ. शांतानिपूर्वरूपाणिशांतन्नोअस्तुकृताकृतं शांतंभूतंचभव्यंचस
१९ र्वमेवशमस्तुनः इयंयापरमेष्ठिनीवाग्देवीब्रह्मसंशिता ययैवस
18 सृजेघोरंतयैवशांतिरस्तुनः इदंयत्परमेष्ठिनंमनोवांब्रह्मसंशि
तं येनैवससृजेघोरं तेनैवशांतिरस्तुनः इमानियानिपंचेंद्रिया
णिमनःषष्ठानिमेहृदिब्रह्मणासंशितानि यैरेवससृजेघोरंतैरे
वशांतिरस्तुनः शंनोमित्रः शंवरुणः शंविष्णुः शंप्रजापतिः शं
नइंद्रोबृहस्पतिः शंनोभवत्वर्यमा शंनोमित्रःशंवरुणःशंविव-
स्वान्छमंतकः उत्पाताःपार्थिवांतरिक्षाछंनोदिविचराग्रहाः शं
नोभूमिर्वेप्यमानाःशमुल्कानिर्हतंचयत् शंगावोलोहितःक्षीराः
शंभूमिरवतीर्यतीः नक्षत्रमुल्काभिहतंशमस्तुनःशंनोभिचराः

शमस्तु सन्तुकृत्याः शंनोनिखाताबल्गाः शमुल्कादेशोपसर्गाः शमु
नोभवंतु शंनोग्रहाश्चान्द्रमसाः शमादित्यः श राहुणा शंनोमृत्यु
धूमकेतुः शंरुद्रास्तिग्मतेजसः शंरुद्राः शंवसवः शमादित्याः श
मग्नयः शंनोमहऋषयोदेवाः शंदेवाः शंबृहस्पतिः ब्रह्मप्रजा
पतिर्धातालोकावेदाः सप्तऋषयोग्नयः तैर्मेकृतंस्वस्त्ययनमिं
द्रोमेशर्मयच्छतु ब्रह्मामेशर्मयच्छंतु विश्वमेदेवाः शर्मयच्छंतु
सर्वेमेदेवाः शर्मयच्छंतु यानिकानिचिच्छांतानिलोकेसप्तर्षयोःवि
दुः सर्वाणिशंभवंतुमे शंमे अस्तुअभयंमे अस्तुपृथिवीशांतिरंतरि
क्षंशांतिर्द्यौः शांतिरापः शांतिरोषधयः शांतिर्वनस्पतयः शांतिर्वि
श्वेदेवाः शांतिः सर्वेमेदेवाः शांतिः शांतिः शांतिः शांतिभिः तामिः शांति

प्र॰ भिः सर्वं शांतिभिः शमयामोहं यदिह घोरं यदिह क्रूरं यदिह पापं
१९ तच्छांतं तच्छिवं सर्वमेव शमस्तु नः १४ शंनो देवीरभिष्टय आपो भ
१९ वंतु पीतये शंयोरभिस्रवंतु नः १ अप्सु मे सोमो अब्रवीदंतर्विश्वा
निभेषजा अग्निं च विश्वशंभवं २ आपः पृणीत भेषजं वरूथं तन्वे ३
मम ज्योक् च सूर्यं दृशे २ शन्न आपो धन्वन्याः ३ शमु संत्वनूप्याः
शन्नः खनित्रिमा आपः शमु याः कुंभ आभृताः शिवा नः संतु वार्षिकीः
ॐ शन्न इंद्राग्नी भवतामवोभिः शन्न इंद्रावरुणा रातहव्या शमिंद्रा।
सोमा सुविताय शंयोः शन्न इंद्रा पूषणा वाजसातौ शंनो भगः शमु नः
शंसो अस्तु शन्नः पुरंधिः शमु संतु रायः शन्नः सत्यस्य सुयमस्तु-
शंसः शन्नो अर्यमा पुरुजातो अस्तु शन्नो धाता शमु धर्ता नो अस्तु शं

नऊरूचीभवतुस्वधाभिः शंरोदसीवृहतीशन्नोअद्रिः शंनोदेवा

नांसुहवानिसंतु शन्नोअग्निज्योतिरनीकोअस्तुशन्नोमित्रावरुणा

श्विनाशं शंनःसुकृतांसुकृतानिसंतु शंनइषिरोअभिवातुवातः

शंनोद्यावापृथिवीपूर्वहूतौशमंतरिक्षंदृशयोनोअस्तु शंनओषधी

र्वनिनोभवंतुशंनोरजसस्पतिरस्तुजिष्णुः १ शंनइंद्रोवसुभिर्देवो

अस्तुशमादित्येभिर्वरुणःसुशंसः शंनोरुद्रोरुद्रेभिर्जलाषः शंनस्त्व

ष्टाग्नाभिरिहशृणोतु शंनःसोमोभवतुब्रह्मशंन शंनोग्रावाणः श

मुशंतुयज्ञाः शंनःस्वरूणामितयोभवंतुशंनःप्रस्वः शंअस्त्वस्तुवेदिः

शंनःसूर्यउरुचक्षाउदेतुशन्नोभवंतुप्रदिशश्चतस्रः शंनःपर्वता

ध्रुवयोभवंतुशंनःसिंधवःशमुसंत्वापः शंनोअदितिर्भवतुव्रतेभिः

शु॰ शन्नोभवतु मरुतःस्वर्काः शन्नोविष्णुः शमुपूषानोअस्तु शन्नोभ
२० भवित्रं शम्वस्तु वायुः शन्नोदेवः सविता त्रायमाणः शन्नो भवंतूष
20 सोविभातीः शन्नः पर्जन्योभवतु प्रजाभ्यः शन्नः क्षेत्रस्यपतिरस्तु
शंभुः २ शंनोदेवाविश्वदेवाभवंतु शन्न सरस्वती सहधीभिरस्तु
शमभिषाचः शमुरातिषाचः शंनोदिव्याः पार्थिव्याः शन्नोआप्याः
शन्नः सत्यस्यपतयोभवंतु शन्नोअर्वंतः शमु संतु गावः शन्न
ऋभवः सुकृतः सुहस्ताः शन्नोभवंतुपितरोहवेषु शन्नोअजए
कपाद्देवोअस्तुरस्तुशन्नः प्रश्निर्भवतु देवगोपाः आदित्यारुद्रावं
सवोजुषंतामिदं ब्रह्मक्रियमाणंनवीयः शृण्वंतुनोदिव्याः पार्थि
वासोगोजाताउत्तरोयज्ञियासः येदेवानामृत्विजोयज्ञियासोम

नोर्यिजत्राश्रमृताऋतस्ताः तेनोरासंतामुरुगायमद्यपूर्यंपात

स्वस्तिभिः सदानः ३ तदस्तुमित्रावरुणास्तदग्रेशंयोरस्मभ्यमि

दमस्तुशस्तं अशीमहिगाधमुतप्रतिष्ठानमोदिवे वृहतेसादना

यशान्नोवातोवातुशन्नस्तुपतुसूर्यः अहानिशंभवंतुनः शं

रात्राप्रतिधीयतांशमुषानोव्युच्छतु उषाअपः स्वसुस्तमः संव

र्तियतिवर्तनिंसुजाततत अयावाजंदेवहि तंसनेममदेमशत

हिमाःसवीराः ततोजपमारमेत् ॐयांकल्पयंतीत्येकर्चस्यप्र

त्यंगिराऋषिः कृत्याद्वेषणीदेवता अनुष्टुप् छंदः जपेविनियो

गः तत्रोक्तरीत्याषडंगंकृत्वा मूलमंत्रंयथाशक्तिजपेत् तद्य

था ॐक्लींयांकल्पयंतिनोरयः क्रूरांकृत्यांचधूमिव तांब्रह्मणा

प्र· अपनिएंअः प्रत्यक्कार्तोर म्छ छ्तु क्रींॐ गुह्येति जपं निवेद्य अने
२१ नजपकर्मणा कृतेन श्रीप्रत्यंगिरादेवता प्रीयतां अद्याश्रीति
21 थौ अमुकगोत्रः अमुकशर्माहं मम सकुटुंबस्य सपरिवारस्य
आयुरारोग्यैश्वर्याभिवृद्ध्यर्थं प्रत्यंगिरास्तोत्रपाठमहं करिष्या
मि तथाच स्तोत्रं ॥ अथ प्रत्यंगिरास्तोत्रमंत्रस्यांगिरा ऋषि र
नुष्टुप्छंदः प्रत्यंगिरादेवता स्तुतौ विनियोगः सर्वत्र जपहो
मांते स्तोत्रमंत्रेण भगवतीं प्रत्यंगिरां पुष्पांजलिना पूजयेत् ॐ
क्रां नमः अंगुष्ठाभ्यां नमः ॐ क्रीं नमः तर्जनीभ्यां नमः ॐ क्रूं नमः
मध्यमाभ्यां नमः ॐ क्रैं नमः अनामिकाभ्यां नमः ॐ क्रौं नमः क
निष्ठिकाभ्यां नमः ॐ क्रः नमः करतलकरपृष्ठाभ्यां नमः एवं

हृदयादिन्यासः ॐ क्रां नमः हृदयायनमः ॐ क्रीं नमः शिरसे स्वा
हा ॐ क्रूं नमः शिखायै वषट् ॐ क्रैं नमः कवचायहुं ॐ क्रौं नमः ने
त्रत्रयाय वौषट् ॐ क्रः नमः अस्त्राय फट् अथ स्तोत्रध्यानम्
कृष्णवर्णां बृहद्रूपां रक्तकुंचितमूर्द्धजां शिरःकपालमालां-
चविकेशीं चूर्णितानना रक्तनेत्रामतिक्रुद्धां लंबजिह्वामधोमु
खीं दंष्ट्राकरालवदनां नेत्रभ्रुकुटिलेक्षणां ऊर्द्ध्वदक्षिणह
स्तेन बिभ्रतीं च परश्वधं अधोदक्षिणहस्तेन बिभ्राणांशूलमू
र्द्धगं तथोर्द्ध्ववामहस्तेन धारयंतीं तथांकुशं अधोवामकरे
ण्याथ बिभ्राणां पाशमेव च एवंध्यात्वा महाकृत्यां स्तोत्रमेतदु
दीरयेत् तथाहि ईश्वरउवाच नमः प्रत्यंगिरे देवि प्रतिकू

प्र॰ लविद्यातिनि नमः सर्वगते शांते परचक्र विमर्द्दिनि नमः सर्व
२२ प्रदे सौम्ये परबंधविदारिणि नमो जगत्त्रयाधारे परमंत्रविदारि
22 णि नमः परात्परे सौम्ये परतंत्र प्रचूर्णिनि नमस्ते चंडिके चंडि
महामहिषमारिणि नमः कालि महालक्ष्मि शुंभदेहविदारिणि
नमो ब्रह्माणि देवेशि रक्तवीजनिपातिनि नमः कौमारि वैकुंठे प
रदर्पनिसूदिनि नमो वाराहि चैंद्राणि परे निर्वाणदायिनि नम
स्ते देवि चामुंडे चंडमुंडविदारिणि नमो मातर्महालक्ष्मि संसारा
र्णवतारिणि निशुंभदैत्यसंहारि कालांतक नमोस्तु ते श्रीप्र
त्यंगिरायै नमः प्रथमपुष्पांजलिं समर्पयामि ॐ नमः कृष्णांब
रशोभिते सकलसेवकजनोपद्रवकारकदुष्टग्रहगजघंटा

संघट्ट संहारिणि अनेकसिंहकोटिचारिणि कालांतके नमोस्तु
ते श्रीप्रत्यंगिरायै नमः द्वितीयपुष्पांजलिं समर्पयामि ॐउ
ग्रे सहस्रवदने ऽष्टादशभुजलनाभूषिते महाबलपराक्र
मेऽत्यद्भुते ऽपराजिते देवि प्रत्यंगिरे सर्वातिशायिनि परक-
र्मविध्वंसिनि परयंत्रमंत्रतंत्रप्रचूर्णादिप्रयोगकृतवशी
करण स्तंभन जृंभणादिकदोषनिचयोच्छेदिनि सर्वशत्रोच्चा
च्चाटिनि मारिणि मोहिनि वशीकारिणि स्तंभिनि जृंभिण्याक
र्षिणि अंधकारिणि सर्वदेवताग्रह योगिनी ग्रहदानव ग्र
हदैत्यग्रहराक्षस ग्रह ब्रह्मग्रह राक्षसग्रह सिद्धग्रह यक्षग्रह ग
रुग्रह विद्याधरग्रह किंनरग्रह गंधर्वग्रहाप्सरोग्रह भूतग्रह

प्र. प्रेतग्रह पिशाचग्रह कूष्मांडग्रह गजादिकग्रह पूतनाग्रह मा
२३ तृग्रह पितृग्रह वेतालग्रह शत्रुग्रह राजग्रह चोरग्रह स्तंत्रग्रहा
23 स्वदेवता ग्रह गोत्रदेवता ग्रहाधिग्रह व्याधिग्रहापस्मारग्रह।
नाकग्रह गलग्रहालकग्रह याम्यग्रह डामरिकाग्रहोदकग्रह विद्यो
रग्रह रतिग्रह छायाग्रह शल्यग्रह सर्पग्रह विशल्यग्रह काल
ग्रह सर्वदोषग्रह विद्राविणि सर्वदुष्टभक्षिणि सर्वपापनिषू
दिनि सर्वयंत्रस्फोटिनि सर्वशृंखलात्रोटिनि सर्वमुद्राविदारि
णि ज्वालाजिह्वे विकरालवक्त्रे रौद्रमूर्ते देवि प्रत्यंगिरा सर्वं
देहि यशो देहि पुत्रान्देह्यारोग्यं देहि भुक्तिमुक्त्यादिकं देहि स
र्वसिद्धिं देहि ममसपरिवारं रक्षरक्ष पूजाजपहोमध्यानार्चना

चैनादिकं कृतं न्युनमधिकं वापरिपूर्णं कुरु कुरु अभिमुखीभव
भवत्तमस्वापराधं श्रीप्रत्यंगिरायैनमः तृतीयपुष्पांजलिः
एवंस्तुता महालक्ष्मीः शिवेन परमात्मना उवाचेदं प्रहृष्टांगी
शृणुष्व परमेश्वरि एतत्प्रत्यंगिरास्तोत्रं येपठंति द्विजोत्तमाः।
शृणवंतः साधयंतश्च तेषां सिद्धि प्रदापयेत् श्रीश्च कुब्जी महा
कुब्जी कालिका गुह्यकालिका त्रिपुरात्वरितानित्या त्रैलोक्यवि
जयाजया जिता पराजितादेवी जयंती भद्रकालिका सिद्धलक्ष्मीर्म
हालक्ष्मीः कालरात्रि नमोस्तुते श्रीप्रत्यंगिरायैनमः चतुर्थ
पुष्पांजलिः कालीकरालविक्रांते कालिके पापहारिणि विक
रालमुखे देवि ज्वालामुखि नमोस्तुते श्रीप्रत्यंगिरायैनमः पंच

प्र॰ पुष्पांजलयः प्रत्यंगिरायै निवेदयेत् ॐ तच्छं योरावृणीमहे
२४ गातुं यज्ञाय गातुं यज्ञपतये दैवी स्वस्तिरस्तु नः स्वस्तिर्मानुषे-
२५ भ्यः ऊर्ध्वं जिगातु भेषजं शंनोऽस्तु द्विपदे चतुष्पदे इति क्र
चं हृदयमन्वालभ्य दशवारं जपति ॐ शांतिः शांतिः शांतिः न
तिथिर्न च नक्षत्रं न ग्रहो न च चंद्रमाः अथर्वमंत्राः संप्राप्ता सर्व
सिद्धिर्भविष्यति॰ ॥ इति ॥